द्वित्ववादार्थः by वेङ्कटेशः

DVITVAVĀDĀRTHAḤ by Veṅkaṭeśa.

A treatise dealing with the nature of 'Dvitva.'
Complete.

अपारभवपाथोधितरणे तरिशेखरम् ।
उपास्महे हयग्रीवपदद्वन्द्वमहर्निशम् ॥

अत्र द्वित्वं कीदृशमिति नालोचनीयं । एकत्वसमाहाररूपमितिवा व्यासज्यवृत्तिजन्यमिति वा व्यङ्ग्यमितिवोपपत्तेः । पक्षत्रयमिति सुधारूढं । वैशेषिकाधिकरणसुधायां भेदस्य स्वरूपत्वसमर्थनाय तत्पूर्वपक्षरचनावसरे एकत्वाभावेऽनेकत्वमपि न स्यात् । तत्समाहाररूपत्वात्तत्कार्यत्वाद्वा तस्येति समाहारत्वोक्त्या प्रथमपक्षस्य तत्कार्यत्वोक्त्या समुदायस्तु भिन्नग इत्येतद्व्याख्यारूपया समुदायोनेकत्वं भिन्नगोऽनेकाश्रितः ।

End :

यत्र त्वाश्रययोरभेदप्रसक्तिस्तत्रैव भेदाभेदबोधकं समुदायमृते इत्यादिकमपि एतत्पक्षेद्वित्वं स्वपर्याप्त्यधिकरण धर्मिभेदभिन्नमेव नापेक्षा । बुद्धिभेदप्रयुक्तानन्तभेदवदिति लाघवमवधेयम । तस्मादयं पक्षो निर्बाधकतमः । इति संक्षेपः ।

सुधावधीरणे(णा)तोपि दुदूषयिषते परा ।
निवारयति तत्रत्या तत्ववाद्यनुबन्धिता ॥
वेङ्कटेशनृसिंहार्यशिष्येण तनयेन वै ।
द्वित्वं व्यचारि सदयं विदांकुर्वन्तु सूरयः ॥

R. No. 5749

Paper. 7 × 4¼ inches. Foll. 70. Lines, 9–12 on a page. Telugu. Injured. Extent, 700 Granthas. Not printed.

Presented in 1935–36 by M.R.Ry. Sarvajñāchārya Avargal, Hospet.

आनन्दरससागर: by आनन्दाश्रम:

ĀNANDARASASĀGARAḤ by Ānandāśrama.

This work teaches that the world is full of misery mingled with happiness and in order to get rid of this worldly existence, one must seek refuge, under a preceptor. The author of the work is Ānandāśrama, disciple of Viśveśvarāśrama.

Complete.

Contains 30 prakaranāṣ.

Beginning :

अनन्तगुणकल्याण मनन्तसुखदायकम् ।

अनन्ताख्यं गुरुं सम्यगनन्तं प्रणमाम्यहम् ॥

श्री चिदानन्दाश्रम विरचितानन्दरससागराख्य ग्रन्थ-

स्य निष्प्रत्यूहपरिपूरणायादौ मङ्गलमातनोति ।

उमाधवं माधवञ्च नत्वाभीष्टार्थसिद्धये ।

कुर्वन् निखिललोकस्य तापत्रयनिवारकम् ॥

आनन्दरसविख्यातं सर्वलोकैकसम्मतम् ।

ग्राह्यं वै मन्दबुद्धीनां बुधानाञ्च विशेषतः ॥

इह लोके अधीताखिलवेदशास्त्रसंपन्नो अमानित्वादिसाधनसंयुक्तः कश्चिदाब्रह्मलोकात्सर्वं कर्म कीर्तितमित्यनित्यंमत्वा त्रिभ्यो नितरां विरक्तः सांसारिकसुखाभाससंयुक्तः संसारानलसन्तप्त आध्यात्मिकाधिदैविकाधि-भौतिकरूपसंसारसागरमध्यजनितगतायाततरङ्गसंयोगवियोगरागद्वेषादि नक्रग्रह-समेतपुत्रमित्रकलत्रादिविमोहावर्ताज्ञानशैवालाल्पसुखासक्त वैसारीणागाध-विषयजलागाधापारनिमज्जनोन्मज्जनजननमरणवीचिकल्लोलादिकमहाघोष रोदना-तिशान्तनिस्तरङ्गहर्षसमेतसुखदुःखात्मकसंसारसागर मुत्तितीर्षुः सद्गुरुं प्राप्य उपहारपाणिः प्रसन्नः सद्गुरून् प्रति पृच्छति ।

Colophon :

इति शिष्याधिकरणं नाम प्रथमप्रकरणम् ।

End :

अत्र भिक्षा(दा)मिव मन्यमानः शतथा सहस्रधा अनेकथा भिन्नो भवति । ब्रह्मणोपि देवान्प्रतिवेदार्थपरमाद्वैतं अनिश्चितार्थश्चेन्मूर्धा युष्माकं च पतिष्यति । "इतः परं न वक्तव्यं विद्यते सुरपुङ्गवाः । सत्यमेव मया प्रोक्तं शंभोः पादौ स्पृशाम्यहम्" ॥

Colophon :

इति सूतसंहितायां ब्रह्मणो देवानाञ्च संवादः । एतदानन्दरससागराख्यग्रन्थाध्ययनान्मुक्तः सर्वोत्कृष्ट इति सिद्धं । नविचिकित्सास्पदम् । आनन्दाश्रमस्वामिभिः विश्वेश्वराश्रमाशिष्येभ्यः कृतमानन्दरससागरम् ।

Colophon :

इति श्रीमत्सदानन्दचिद्घनानन्दाश्रम वरशिष्यपरमहंसपरिव्राजकाचार्य आनन्दाश्रमविरचितसंस्कृतभाषारूपानन्दरससागराख्यग्रन्थे सार्वोपनिषदर्थप्रतिपादकयोगो नाम त्रिंशत् प्रकरणं संपूर्णम् ।

Scribe adds

दुन्दुभिसंवत्सरं

R. No. 5750

Paper. 9½ × 4 inches. Foll. 18. Lines, 11 on a page. Devanāgarī. Good. Extent, 220 Granthas. Not printed.

Presented in 1935–36 by Śrī Sarvajñācharya Avargal, Hospet.

अद्वैतनवनीतम् by कृष्णावधूतपण्डितः

ADVAITANAVANĪTAM by Kṛṣṇāvadhūtapaṇḍita.

This work gives in brief the essence of Advaita.

Complete.

Beginning :

वयं वन्दामहे भूयः कर्म किं तदकर्मकम् ।
नयप्रयोगतो भावे प्रयोगः कर्तृकर्मणोः ॥
अद्वैतं मतमवलोक्य कोणकोणं
निश्शेषं नवनवनीत द्धरिष्ये ।
धीमन्तोऽनिलसमये विहर्तुमन्तः
काङ्क्षन्तः सपदि सुखं गिलन्तु सन्तः ॥
प्रक्रिया च प्रमेयश्च प्रमाणं दोष उच्यते ।
क्वचि दुक्तानुवादोपि संगत्या मतभेदतः ॥

पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवीतिश्रुतिः। ब्रह्मणो मूलप्रकृत्यधिष्टानभूतः पाद एकः। पादत्रयंतु अमृतरूपं दीप्यमान शुद्धनिर्धर्मिकं अनादेर्मूलप्रकृतेः प्रधानं अव्यक्तमितिनाम। माया अविद्यातामसी, राजसी, सात्विकेत्येतत्समष्टिरूपा। अनादयोऽनन्तजीवाः स्वस्वकर्मवासनादिभिः सहजतुपिण्डे सुवर्णरेणव इव प्रकृतौलीनाः सन्ति।

Colophon :

इति श्रीकृष्णावधूतपण्डितकृतौ अद्वैतनवनीते प्राक्रियानिरूपणं नाम प्रथमगोलकम्।

End :

ऐश्वर्यस्याविद्यकत्वात्। नहीश्वरस्याविद्या। निरञ्जनत्वात्। बद्धपुरुषान्तराविद्याकल्पितमेव। तस्मान्मुक्तस्येश्वरभावोयुक्तः।

निन्दको निकटेमेस्तु दोषमादाय तोषकृत्।
गृहिणः श्रीमतो यद्वद्विष्टागतौ गृहान्तिके॥
यस्योपास्योपदेष्टारौ सूत्रकृत्समवर्तिनौ।
जाप्यौ च तारकाष्टार्णौ तेनेदंकृतमर्थिसात्॥

Colophon :

इति श्रीकृष्णावधूतपण्डितविरचितेऽद्वैतनवनीते मतभेदानिरूपणं नाम पञ्चमगोलकम्। समाप्तश्चायं ग्रन्थः।

R. No. 5751

Paper. $9\frac{1}{2} \times 4$ inches. Foll. 14. Lines, 9–11 on a page. Devanāgarī. Good. Extent, 130 Granthas. Not printed.

Presented in 1935–36 by M.R.Ry. Sarvajñācharya Avargal, Hospet.

तर्कनवनीतम् by कृष्णावधूतपण्डितः

TARKANAVANĪTAM by Kṛṣṇāvadhūtapaṇḍita.

In this work, the author gives the essential points of the Nyāya system.

Incomplete.

Beginning :

गोपवधूटीदयितं नत्वा निर्मथ्य तर्कदधिराशिम् ।
तत्सारं नवनीतं समुद्धरामः सुखाय बालेभ्यः ॥

पदार्थोद्विविधः । भावाभावाविति । भावः षड्विधः । द्रव्यगुणकर्म सामान्यविशेषसमवायभेदात् । द्रव्याणि नव पृथिवीजलतेजोवायुव्योमकाल दिगात्ममनांसीति । पृथिवीजलतेजोवायूनां परमाणवः आकाशकालदिगात्ममनांसिचानित्यद्रव्याणि । उत्पत्तिनाशरहितत्वं नित्यत्वं । पृथिवीजलतेजोवायूनां शरीरेन्द्रियविषयाः अनित्याः । उत्पत्तिविनाशवदनित्यं । पृथिवीशरीरं चतुर्विधम् । जरायुजमण्डजं स्वेदजमुद्भिज्जमिति ।

End :

युक्ताङ्गराहित्यं, अयुक्ताङ्गाधिक्यं, अनुचितविषय वृत्तित्वञ्चेति त्रिविधमसामर्थ्यमसाधारणम् । एतत्सर्वं मत्कृते लोकोपकारे मुद्रिते द्रष्टव्यम् । निग्रहस्थानानितु प्रतिज्ञाहानिः, प्रतिज्ञान्तरं, प्रतिज्ञाविरोधः, प्रतिज्ञासन्यासो, हेत्वन्तर, मर्थान्तरं निरर्थकमविज्ञातार्थकमपार्थकम प्राप्तकालं न्यूनमधिकं पुनरुक्त मननुभाषण मज्ञानमप्रतिभाविक्षेपो मतानुज्ञापर्यनुयोज्यो . . . .

R. No. 5752

Paper. $11\frac{1}{2} \times 6\frac{1}{4}$ inches. Foll. 19. Lines, 12 on a page. Devanāgarī. Slightly injured. Extent, 405 Granthas. Printed.

Presented in 1935–36 by Śrī Sarvajñācārya Avḷ., Hospet.

पराशरधर्मशास्त्रम् by **पराशरः**

PARĀŚARADHARMAŚĀSTRAM by Parāśaraḥ.

Same work as that described under D. No. 5275.

1 to 10 Adhyāyās complete.

R. No. 5753

Paper. $12\frac{1}{2} \times 5\frac{1}{2}$ inches. Foll. 45. Lines, 12 on a page. Devanāgarī. Good. Extent, 1,980 Granthas. Not printed.

Presented in 1935–36 by M.R.Ry. Sarvajñacarya, Hospet.

वेदान्तरत्नमाला—अलङ्कारादर्शसहिता by **श्रीनिवासः ।**

VEDĀNTARATNAMĀLĀ with ALAṄKĀRĀDARŚA by Śrīnivāsa.

Same work as that described under R. No. 3831.

R. No. **5754**

Paper. 11½ × 6 inches. Foll. 6. Lines, 10 on a page. Devanāgarī. Injured. Extent, 50 Granthas. Printed.

Presented in 1935–36 by M.R.Ry. Sarvajñācārya Avḷ, Hospet.

विशिष्टाद्वैतविजयवादः by नरहरिः

VIŚIṢṬĀDVAITAVIJAYAVĀDAḤ by Narahari.

In this work, the author reputes the objections raised by other schools of thought against the Viśiṣṭādvita school and establishes that only the views of the Viśiṣṭādvaita school satisfy the sense expressed by the Upaniṣads.

Complete.

Beginning :

पायात्सर्वः (वः) स्वव्यतिरिक्तसर्व
वपुश्श्रयोऽन्तर्धिषणोत्तमः पुमान् ।
यस्याः कटाक्षयत(क्षायत) भाष्यदृष्ट्या
सुनिर्गुणो भव्यगुणाकरोऽभूत् ॥

अत्र खलु अखिलहेयप्रत्यनीककल्याणगुणगणैकतानं स्वेतर समस्तवस्तु विलक्षणं विशिष्टाद्वैतं ब्रह्म सर्व श्रुतिस्मृतीतिहास पुराण वेद्य मिति श्रीमद्रामानुजाचार्यै भाष्ये राद्धान्तितम् ॥

End :

कूर्मरोमादि विभ्रम इत्यादिकं तु भाष्यादावेव सुस्पष्ट मित्युक्तमिति विस्तरभयान्नेह लिख्यते ।

यतीश्वरसरस्वती सुरभिताशयानांमुदे
प्रसङ्गरणमण्डले विजयनाथमेतन्मया ।
कृतं सुकृतिनां सतां स्वगणयाशनावलं
सु . . त्यविजयं शुभंग . . वते प्रयच्छन्तु वै ॥

Colophon :

इति श्रीनैध्रुवकाश्यपगोत्रपवित्रेण श्रीमद्राघवसूनु(श्रीनि)वासकुल विद्वच्छूडामणिना नरहरिनाम्ना विरचिते विशिष्टाद्वैत विजयवादः समाप्तः ।

R. No. 5755

Paper. 11¾ × 4 inches. Foll. 23. Lines, 10 on a page. Devanāgarī. Injured. Extent, 715 Granthas. Not printed.

Presented in 1935–36 by M.R.Ry. Sarvajñācārya Avḷ, Hospet.

पार्वतीकल्याणम् by हरियज्वा

PĀRVATĪKALYĀṆAM by Hariyajvan.

A drama in seven acts describing the marriage of Pārvati with Śiva. Complete.

Beginning :

आम्नायैर्य ऋगादिभिः स्मृतिगणै स्तन्त्रेतिहासागमै·
रङ्गैः षड्भि-रभिष्टुतः सुरवरैः ब्रह्मादिभिर्वन्दितः ।
भूम्यंभोऽनलवायु रवार्कशशभृद्यज्वाष्टमूर्तिःसवः
कल्याणानि निरन्तरं वितनुताच्छैलेन्द्रजावल्लभः ॥
ईशानः सर्व विद्यानां सर्वभूतेश्वरेश्वरः ।
ब्रह्मविष्ण्वादिदेवेड्यः पातु वोऽनारतं शिवः ॥
(नान्द्यते सूत्रधारः प्रविश्येतस्ततः परिक्रम्य)

End :

महोभिरष्टभिश्चैतं नाटकं हरियज्वना ।
कृत्वाष्टमूर्त्तये भक्त्या शङ्कराय समर्पितम् ॥
ये पठिष्यन्ति सतत मेतं नाटकमुत्तमम् ।
ते पूर्णार्था भविष्यन्ति पुरुषाः श्लोकयोर्द्वयोः ॥
यदिरु कारीति हि सध्रीचीना न विद्यते ।
तथापीयं कथापूज्या पापघ्नी परमेश्वरी ॥

Colophon :

इति नरहरिसूरिसूनुना हरियज्वना प्रणीते पार्वतीकल्याणाभिधे नाटके सप्तमोऽङ्कः समाप्तः ।

R. No. 5756

Paper. 12 × 4¾ inches. Foll. 18. Lines, 11 on a page. Devanāgarī. Much injured. Extent, 433 Granthas. Not printed.

Presented in 1935–36 by M.R.Ry. Sarvajñācārya Avḷ., Hospet.

रुक्मिणीकल्याण चरितम् by श्यामाचार्यः ।

RUKMIṆĪKALYĀṆACARITAM by Syāmācārya.

This is a poem describing the marriage of Rukmini with Kṛṣṇa. Complete.

Beginning :

सेवे सारसनयनं भावे वसुदेवदेवकी सूनुम् ।
नन्दयशोदानन्दं वन्दे वन्दारु म . . . . . ॥

कलये हृदये कमलां करुणालोकाश्रितार्तिहृतविमलाम्
अधिगतमणिमयमालां विष्णुसतीं नौमि शुभलीलां ॥

भुवनतलेऽधिकमहितापूरासीद्द्वारकेति नामयुता ।
समुदितसद्गुणविहिता द्यौरिव लोकेषु विख्याता ॥

End :

एवं कृत्वा शौरिः संभृतकामः सुरुक्मिणीदेव्याः ।
. . . . . . क्ष्मीदेव्या यथा विष्णुः ॥

इति चरितं रुक्मिण्याः शृण्वन्ति पठन्ति बोधय . . . ।
. . . . . . त्र प्रथितयशस्विनो महानन्दाः स्युः ॥

Colophon :

इति श्रीमद्वाधूलवंशामृतानिधि . . . . . तज्येष्ठेनानन्तपादद्वय विहितधिया श्यामनाम्ना कृतेयम् ।

R. No. 5757

Paper. 8¾ × 4½ inches. Foll. 7. Lines, 10 on a page. Devanāgarī. Much injured. Extent, 121 Granthas. Not printed.

Presented in 1935–36 from M.R.Ry. Sarvajñācārya Avḷ, Hospet.

सुभाषितरत्नमञ्जरी by नरसिंहाचार्यः

SUBHĀṢITARATNAMAÑJARĪ by Narasiṁhācārya.

This is a work on anthology.
Complete.

Beginning :

वन्दे वन्दारुवृन्दाना ममन्दानन्ददायि यत् ।
तदिन्दि(इन्दि)रामन्दिरोरस्कं दरं सुन्दरं महः ॥

कवीन्द्रमण्डलीक्लृप्तसुविचित्रपदक्रमा ।
विभाति भुवमश्लाघ्या सरसीव सरस्वती ॥

शारदोल्लासविभ्राजदवदातगुणोदया ।
हंसीव कविता भाति सारसोदारविभ्रमैः ॥

End :

यत्प्रभूतनयोल्लासी सद्यशो . . . चितः ।
ससुमित्रात्मजो भास्वत्सन्तानप्रथयैधत ॥

घनगिरिकुलसिन्धुशीतभानोः
कृतिरिह वेङ्कटनारसिंहनाम्नाम् ।

मृदलतरमुदां मुदे बुधानां
भवतु सुभाषितरत्नमञ्जरीयम् ॥

Scribe adds.

अङ्गीरसाब्दे आषाढे सप्तम्यां शुक्लपक्षके ।
लिखितं श्रीनिवासेन बालसंघस्य तुष्टये ॥

Colophon :

इति श्रीमत्कविकुलशिरोमणिनरसिंहाचार्यकृतसुभाषितरत्नमञ्जरी समाप्ता ।

R. No. 5758

Paper. 11½ × 4½ inches. Foll. 28. Lines, 10 on a page. Devanāgarī. Much injured. Extent, 756 Granthas. Printed.

Presented in 1935-36 by M.R.Ry. Sarvajñācārya Avargal, Hospet.

यमकभारतम् by **आनन्दतीर्थः टीका** by **यदुपत्याचार्यः**

YAMAKABHĀRATAM by Ānandatīrtha, Ṭīkā by Yadupatyācārya.

Same work as that described under D. Nos. 11888 and 11890.

Complete.

R. No. 5759

Paper. 7 × 4½ inches. Foll. 17. Lines, 7–9 on a page. Telugu. Good. Extent, 200 Granthas.

Presented in 1936–37 by M.R.Ry. Sarvajñācārya, Hospet, Bellary district.

वेदान्तकारिकावली by बुच्चि वेङ्कटाचार्य

VĒDĀNTAKĀRIKĀVALĪ by Bucchi Veṅkaṭācārya.

Same work as that described under D. No. 5005.

R. No. 5760

Palm leaf. 16 × 1¼ inches. Foll. 59. Lines, 12 on a page. Grantha. Slightly injured. Extent, 2,832 Granthas. Printed.

Presented in 1935–36 by M.R.Ry. K. C. Gopala Ayyangar Avargal, Sub-Judge, Vizagapatam.

सङ्कल्पसूर्योदयः by वेदान्तदेशिकः

SAṄKALPASŪRYŌDAYAH by Vēdāntadēśika.

Same work as that described under D. No. 12710.

Complete.

R. No. 5761

Palm leaf. 16 × 1¼ inches. Foll. 60. Lines, 10 on a page. Grantha. Much injured. Extent, 2,000 Granthas. Printed.

Presented in 1935–36 by M.R.Ry. K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

सङ्कल्पसूर्योदयव्याख्या

SAṄKALPASŪRYODAYAVYĀKHYĀ.

Same work as that described under D. No. 12715. Wants beginning and end.

R. No. 5762

Palm leaf. 15 × 1¼ inches. Foll. 75. Lines, 13 on a page. Grantha. Slightly injured. Extent, 3,700 Granthas. Printed.

Presented in 1935–36 by M.R.Ry. K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

रामायणम्

RĀMĀYAṆAM.

Same work as that described under D. No. 1807.

Contains Sundarakāṇḍa. Complete.

R. No. 5763

Palm leaf. 15 × 1¼ inches. Foll. 154. Lines, 10 on a page. Grantha. Slightly injured. Extent, 6,000 Granthas.

Presented in 1935–36 by M.R.Ry. K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

रामायणम्

RĀMĀYAṆAM.

Same work as that described under D. No. 1853.

Sundarakāṇḍa only complete.

R. No. 5764

Palm leaf. 16 × 1¼ inches. Foll. 150. Lines, 8 on a page. Grantha. Slightly injured. Extent, 4,800 Granthas. Printed.

Presented in 1935–36 by M.R.Ry. K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

रामायणम्

RĀMĀYAṆAM.

Same work as that described under No. 1807.

Contains 1—4 kāṇḍas complete.

R. No. 5765

alm leaf. 14 × 1¼ inches. Foll. 200. Lines, 8 in a page. Grantha. Slightly injured. Extent, 4,800 Granthas. Printed.

Presented in 1935–36 by M.R.Ry. K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

सेतुमाहात्म्यम्

SETUMĀHĀTMYAM.

Same work as that described under D. No. 2589.

Complete.

R. No. 5766

Palm leaf. 15 × 1¼ inches. Foll. 138 Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1935-36 by M.R.Ry. K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

(*a*) प्रपत्तिविषयः

PRAPATTIVIṢAYAḤ.

Foll. 1*a*—5*b*. Extent, 150 Granthas. Not printed.

Same work as that described under R. No. 660 (*f*).

Incomplete.

(*b*) ब्रह्मसूत्रम्

BRAHMASŪTRAM.

Foll. 6*a*—16*b*. Extent, 330 Granthas. Printed.

Same work as that described under R. No. 299.

Complete.

(*c*) वेदान्तदीपः by रामानुजाचार्यः

VEDĀNTADĪPAH by Rāmanujācārya.

Foll. 17*a*—138*b*. Extent, 3,400 Granthas. Printed.

Same work as that described under D. No. 5013.

Complete.

R. No. 5767

Palm leaf. 14 × 1¼ inches. Foll. 83. Lines, 7 in a page. Grantha. Slightly injured. Extent, 1,660 Granthas. Printed.

Presented in 1935-36 from M.R.Ry. K. C. Gopalan, B.A., B.L., Sub-Judge, Vīzagapatam.

भागवतम्—सव्याख्यानम्

BHĀGAVATAM—with commentary.

Same work as that described under D. No. 2180.

Contains the 6th skandha only.

R. No. 5768

Palm leaf. 13 × 1¼ inches. Foll. 50. Lines, 8 in a page. Grantha. Slightly injured. Extent, 1,000 Granthas. Printed.

Presented in 1935-36 by M.R.Ry. K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

कृष्णयजुर्वेदकाठकम्
KṚṢNAYAJURVEDAKĀṬHAKAM.

Same work as that described under D. No. 184.

Complete.

Foll. 46—50 contains Ācāryatanians.

R. No. 5769

Palm leaf. $12 \times 1\frac{1}{4}$ inches. Foll. 67. Lines, 8 in a page. Grantha. Injured Extent, 1,800 Granthas.

Presented in 1935–36 by Śrī K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

श्रीगुणरत्नकोशः सव्याख्यः by पराशरभट्ट and श्रीनिवास.

ŚRĪGUṆARATNAKOŚAḤ with Commentary by Parāśarabhaṭṭa and Śrīnivāsa.

Incomplete.

Similar to the work described under D. No. 9756.

Beginning :

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसेमेऽस्तुभूयसे ।
श्रीलक्ष्मणार्यकरुणापरिलब्धबोधः
श्रीमन्महाजनकदेशिकशिक्षितार्थः
श्रीश्रीनिवास इह कौशिकवंशजन्मा
व्याख्याति विष्णुरमणीगुणरत्नकोशम् ॥

इह खलु हारीतकुलतिलकश्रीवत्साङ्कमिश्रनन्दनः श्रीरङ्गनाथतन्नायिकाभ्यां यथाविधि सकललोकसाक्षिकं नवीकृतपूर्वसंबन्धः स्वजननीभूत-श्रीरङ्गनायिकानिर्हेतुकपरमकृपयावाप्तसमस्तशास्त्रः निरसंशयमधिगतसमस्त तत्वरहस्यार्थविशेषः श्रीभाष्यकारकृपापरिपूर्णविजृम्भितसकलाभ्युदयशाली श्रीरङ्गेशपुरोहितः श्रीभट्टार्यः . . . .

सतत मनुसन्धातव्य श्रीगुणरत्नकोशाख्यं श्रीरङ्गनायिकास्तोत्रं चकार ।

End :

किंच विश्लिष्य वासो वने विश्लिष्य क्षणविश्लेषासहं स्वेनापि क्षणं विसोढुमशक्यं भगवन्तं रामात्मनावतीर्णं वियुज्य विरहय्येत्यर्थः । वने रावणभवनोपवने वासोजातः ।

R. No. **5770**

Palm leaf. 16 × 1¼ inches. Foll. 122. Lines, 10 in a page. Grantha. Slightly injured. Extent, 3,904 Granthas. Printed.

Presented in 1935–36 by Śrī K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

भागवतव्याख्या—अन्वयः by वेङ्कटकृष्णः

BHĀGAVATAVYĀKHYĀ—ANVAYA by Veṅkaṭakṛṣṇa.

Same work as that described under D. No. 2238.

Contains 5th skandha complete.

R. No. **5771**

Palm leaf. 15 × 1¼ inches. Foll. 79. Lines, 7 in a page. Grantha. Slightly injured. Extent, 2,196 Granthas. Printed.

Presented in 1935–36 by Śrī K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

भागवतम्

BHĀGAVATAM.

Same work as that described under D. No. 2162.

Contains 10th skandha incomplete.

R. No. **5772**

Palm leaf. 16 × 1¼ inches. Foll. 78. Lines, 14 in a page. Grantha. Slightly injured. Extent, 3,900 Granthas. Printed.

Presented in 1935–36 by Śrī K. C. Gopalan, B.A., B.L., Sub-Judge Vīzagapatam.

भागवतव्याख्या—तात्पर्यचन्द्रिका by वेङ्कटकृष्ण

BHĀGAVATAVYĀKHYĀ—TATPARYACANDRIKĀ by Veṅkaṭa-kṛṣṇa.

Same work as that described under D. No. 2238.

Contains 11th skandha only.

R. No. 5773

Palm leaf. 15 × 1¼ inches. Foll. 82. Lines, 12 in a page. Grantha. Slightly injured. Extent, 3,280 Granthas. Not printed.

Presented in 1935–36 by Śrī K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

भागवतम् - अन्वयव्याख्यासहितम् by वेङ्कटकृष्णः

BHAGAVATAM with ANVAYAVYĀKHYA by Venkatakṛṣṇa.

Same work as that described under D. No. 2238.

Contains 12th skandha only.

R. No. 5774

Palm leaf. 14 × 1¼ inches. Foll. 75. Lines, 5 on a page. Grantha. Much injured. Extent, 1,350 Granthas. Printed.

Presented in 1935–36 by Śrī K. C. Gopalan, B.A., B.L., Sub-Judge, Vizagapatam.

स्तोत्ररत्नम् by यामुनाचार्यः

STOTRARATNAM by Yāmunācārya.

Same work as that described under R. Nos. 160 (*t*) and 173 (*g*).

Complete.

R. No. 5775

Paper. 10½ × 9½ inches. Foll. 44. Lines, 20 in a page. Dēvanāgarī. Good. Extent, 1,100 Granthas. Not printed.

Transcribed in 1936–37 from a MS. of Śrī Sarvajñācāryar of Hospet.

इन्दिराभ्युदयचम्पूः by रघुनाथकविः

ĪNDIRĀBHYUDAYACAMPŪḤ by Raghunāthakavi.

Foll. 1*a*—44*b*.

A work, in the *Campu* style, on the Puranic story of Goddess Mahālakṣmī, the Consort of God Viṣṇu.

Complete.

Beginning :

वन्दे तं देवमनिशं वाञ्छितार्थप्रदं सदा (सताम्) ।
यो हरिस्सकलैः कण्ठादुपर्यवति कथ्यते ॥

संसाराब्धिं विमथ्य स्वमतिभुजगराड्बद्धशास्त्राद्रिणा तत्
सन्तापक्ष्वेलमुग्रं भवगतमखिलं साधुबुध्वाबुधौघः ।
अक्षीणां भक्तिलक्ष्मीमपि सहजविवेकेन्दुमानन्दयोगा
द्यस्मिन्निक्षिप्य यस्मात्स्वयममृतमगात्तत्पदाब्जं भजेऽहम् ॥

* * * *

विष्णुपदसेवको यस्सत्वामृतकरोद्विजाधिराजश्च ।
सकथं विषादभाक्स्यात्तदपि कदाचित्पुनर्हरिं भजते ॥

तत्तादृशोऽहमवकर्ण्य हारिर्विषार्मे
र्भीतः पपौ हरइति प्रविशङ्कचेताः ।
निद्रामवापमथ कश्चिदुवाचविप्रः
स्वप्ने किमेवमिति भागवतानभिज्ञः ॥

अथ भागवतं श्रुत्वा व्यक्ततत्त्वसुधां कथाम् ।
सन्तोषमगमं तत्र निगमंभूरि चिन्तयन् ॥

ततस्तद्याथार्थ्यं करबदरयन्बालकतते
रपिप्रीत्यै पद्मा कमन(ल)पदसेवारतिजुषाम् ।
इदंश्रव्यंकाव्यं गुणिभिरिह पद्माभ्युदयमि
त्युदारंकुर्वेहं नतसुलभनारा(यण) परम् ॥

End :

यद्यद्धरिपारम्यप्रकटनमस्तीहतत्तदखिलमपि ।
श्री भागवते पाद्मे स्कान्देऽन्यत्रापिसूत्रमेवबहु ॥

रसमधुकलितैस्सद्गुणपरिमलभरितैस्सचित्रकिञ्जल्कैः ।
हरिरर्चितो वचोमयैः कुसुमैरेतैःश्रियं तनोतु मम ॥

ऋतुनिधिदिङ्निगमाख्या प्रकटितसङ्ख्याक कलियुगाब्दानाम् ।
उपरिरचितः प्रबन्धो जयतुचिरं विष्णुवल्लभाभ्युदयः ॥

Colophon :

इति श्रीवत्सकुलज श्री रघुनाथकविवरविरचिते श्रीमदिन्दिराभ्युदयाह्वये चम्पूप्रबन्धे अभ्युदयोल्लास स्तुरीयाधिक(ार):

R. No. 5776

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 68. Lines, 20 in a page. Devanāgarī. Good. Extent, 1,700 Granthas. Not printed.

Transcribed in 1936–37 from a MS. obtained on loan through Dr. T. R. Cintāmaṇi, M.A., PH.D., Senior Lecturer in Sanskrit, Oriental Research Institute, University of Madras.

न्यायसारव्याख्या—न्यायकलानिधिः by आनन्दानुभवः

NYĀYASĀRAVYĀKHYĀ—NYĀYAKALĀNIDHIḤ by Añandānu bhava.

Foll. 1*a*—65*a*. Foll. 65*b*, 66, 67 and 68 are left blank.

This is a commentary on the Nyāyasāra of Bhāsarvajña.

Complete.

Beginning :

दिनकरकरचयशशिकरसङ्घा
नुपहतमपि घनघननिबिडंयत् ।

नतजनहृदयकुहरगतमान्ध्यं
प्रहरति तदवतु पदमिह वाण्या (:) ।।

रतिपतिखरतरशरचयभिन्नाः
किमुदिवि कतिकतिनहि सुरसंघाः ।

जयति (स) पशुपतिरिहगिरिकन्या
समवपुरपि रति (पति) जयकृद्यः ।।

गणपतिपदयुग्मं किं ननमति जडधीर्लोकः ।
यदखिलदुरितौघघ्नं सकलफलजनेर्हेतुः ।।

महादेवाश्रमंवन्दे गुरुं चिन्तामणिंनवम् ।
अनित्यफलदं नानाविद्याधरशिरोमणिम् ।।

न्यायसारकुमुदोदराद्धृत न्यायतन्त्रमधुदानकौतुकी ।
श्रोतृभृङ्गसुखदो विरच्यते युक्तिरश्मिरुचिरः कलानिधिः ।।

शिष्टाचारपरिपालनायाविघ्नसमाप्तिप्रचयगमनयथाशास्त्रार्थस्फुरणसिद्ध्यर्थं विशिष्टेष्टदेवतानमस्कारपूर्वकं ग्रन्थप्रतिपाद्यमर्थमाद्यश्लोकेन सुखबोधायदर्शयति—प्रणम्येति ।

Colophon :

इत्यानन्दानुभवाचार्यकृते न्यायकलानिधौ अनुमानपरिच्छेदस्समाप्तः ।

End :

न्यायरत्नमाचार्यमाराध्य मयापिलब्धं स्वरोपकारिभूतं, ननुकथं परेषां तेनोपकाराद्भवत्यत आह—उत्सार्जितामिति । द्विजानां संसारमुक्त्यै ग्रन्थगौरवभीत्या स्वपादौर्निबध्योत्सर्जितमित्यर्थः ।

Colophon :

इत्यागमपरिच्छेदेन्यायसारटिप्पणे आनन्दानुभवाचार्यकृतेन्यायकला निधौ श्रीमन्महादेवाश्रमशिष्येण यागिना विश्वनाथाश्रमेणायं कृतेन्यायकलानिधिस्समाप्तः

R. No. 5777

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 206. Lines, 20 in a page. Devanāgarī. Good. Extent, 6,135 Granthas.

Transcribed in 1936–37 from a MS. of Śrī Narasimhācāryar Avargal, Oriental Library, Mysore.

श्रीभाष्यभावप्रबोधनम् by मेघनादारिः

ŚRĪBHĀṢYABHĀVAPRABODHANAM by Meghanādārī.

Foll. 1*a*—205*a*. Foll. 205*b* and 206 are left blank.

In this work, the author Meghanādāri throws light on the views of the Viśiṣṭādvaita school contained in the Śrībhāṣya of Śrī Rāmānuja. The author refers to his work Nayaprakāśika, the commentary on the Śrībhāṣya which work has been described under D. No. 4958.

Contains the first pāda of the first adhyāya.

Beginning :

वागादिभिर्गुरून् प्राग्य नाथार्यादीन् कृपालयान् ।
रामानुजं यतिवरं तत्पूर्वानपि देशिकान् ॥
लक्ष्मीं वक्षसि बिभ्राणं हयास्यं च तमोपहम् ।
यते वेदान्तभाष्येषु गुरुभावप्रबोधने ।

नयप्रकाशिके प्रायो न्यायमार्गाः प्रदर्शिताः ।
भाष्याणान्त्वतिगम्भीरः क्रमाद्भावो न बोधितः ।
अबोधितस्स न ज्ञातुं शक्यो विद्वत्तमैरपि ॥
द्वित्रिश्रवणमात्रेण गुरुसेवालसात्मभिः ।
अबोधोवा श्रुतांशानामपि सेवारतात्मनाम् ।
सत्संप्रदायविच्छेदात्तदुत्सादो भवेत्ततः ।
निरावाधात्रायीमार्गात् भ्रष्टा निरयगामिनः ।
अतः प्रयत्नो नानर्थो भाष्यभात्रप्रबोधने ।
श्रुते यद्यपि कात्स्न्र्येन स्मृतोनेति नहीयते ॥

* * * *

ब्रह्मसूत्रव्याख्यारंभे स्वाभिलषित भगवद्भक्तिप्रार्थनं न सङ्गतम् । सेतुं प्रति जिगमिषोर्हिमवद्गमनमिवेतिचेन्न । प्रारिप्सितस्याविघ्नपरिसमाप्तिप्रचय-गमनयोः सिध्यर्थं पूर्वाचरितमङ्गलाचारपरत्वात् महाभाष्यकारादिभिः न तदाचारः कृत इति भाष्यारम्भे न तद्युक्तमिति चेत् तन्न, अथशब्दानु-शासनमित्यादौ अथादिब्देनप्रयोगैस्तेषामपि तदाचारात् स्वाभिलषितभक्ति-प्रार्थनं न मङ्गलाचार इति चेत् तन्न । वृषोभिलषित इत्यादौ धर्मादेर्दर्शना-देरपि इष्टसाधनत्वस्मरणात् ।

End :

किन्त्वेवंविधस्य सर्वार्थोऽधिकरणस्य तत्र श्रुनत्वा दित्याद्युक्तिः न हेत्व भिधानपरा । जीवन्मुक्तप्राणलिङ्गान्नेत्यंशेप्येवंविधविषयचोद्यपरः । नोपासनात्त्रैविध्यादिति हेतूक्तितत्परिहारपरेत्यभिप्रायादाह । एतदिति । अधिकरणार्थमुपसंहरति अत इति ।

Colophon :

इति श्रीमदात्रेयनाथसूरिसूनुमेघनादारिविरचिते श्रीमद्रामानुजीयोत्तर-मीमांसाभाष्यभावप्रबोधने प्रथमाध्यायस्य प्रथमः पादः ।

R. No. 5778

Paper. 10½ × 9½ inches. Foll. 8. Lines, 20 in a page. Devanāgarī. Good.

Transcribed in 1936–37 from a MS. of Adyar Library, Adyar.

(*a*) चण्डीरहस्यं by नीलकण्ठदीक्षितः

CAṆḌIRAHASYAM by Nīlakaṇṭhadīkṣita.

Foll. 1*a*—4*b*. Extent, 80 Granthas.

Stanzas in praise of Caṇḍī, an epithet of Durgā. The authorship is attributed to Nīlakaṇṭhadīkṣita.

Complete.

Beginning :

यच्छक्तिलेशसकृदर्पणपात्रभाव
मात्रादपि द्रुहिणशौरिमहेश्वराणाम् ।
प्राप्तो यदि श्रुतिशतैः परमात्मभाव-
स्तामम्ब देवि भवतीं किमिति स्तुवन्तु ॥

कृत्वा मुखं पशुपतिर्भवतीं किलैकां
निर्माति पालयति हन्ति जगन्ति देवः ।
तज्जामिता विपरीवृत्तकृते तमेव
शम्भुं मुखं कृतवती भवतीति मन्ये ॥

End :

अभ्यर्थनीयमखिलं भवदाश्रिताना
मभ्यर्थितं प्रथममेवहि देवसङ्घैः ।
अम्ब स्मरन् सफलयाम्यवशिष्टमायुः
रङ्गानिते भुवनमङ्गलमङ्गलानि ॥

(*b*) रामायणसारसंग्रहरघुवीरस्तवः ।

RĀMĀYAṆASĀRASAṄGRAHARAGHUVĪRASTAVAḤ.

Foll. 4*b*—8*a*. Foll. 8*b* is left blank. Extent, 80 Granthas.

This book contains stanzas in praise of Rāma and the stanzas give a summary of the Rāmāyaṇa. The author is the famous Nīlakaṇṭhadīkṣita, the grandson of Āccāndīkṣita, brother of the famous Appayadīkṣita.

Beginning :

वेधोवितीर्णविशदान्नविवर्ततां स्वा-
मप्रस्मरन् रघुपते कुलतन्तुमस्य ।
मन्ये ररक्षिथ विभीषणमप्रमत्तो
निः शेषयन्नपि कुलं रजनीचराणाम् ॥

यज्ञं ररक्षिथ मुनेर्यदि कौशिकस्य
यज्ञात्मनस्तव तुलां विदुरात्मरक्षाम् ।
कीर्तिं यदीच्छसि कृतार्थय मामनाथं
काकुत्स्थ वीर करुणामसृणैरपाङ्गैः ॥

End :

सत्यप्रियाय शरणागतवत्सलाय
सर्वापदां प्रशमनाय सकृत् प्रपच्या ।
श्रीरामनामपरिपूतजगत्त्रयाय
सीतासखाय पुरुषाय नमो नमस्ते ॥

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्य चतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्य श्रीमदाच्चा दीक्षितपौत्रेण नारायणदीक्षितात्मजेन श्रीभूमिदेवीगर्भसंभवेन श्रीनीलकण्ठ-दीक्षितेन विरचितासु कृतिषु रामायणसारसंग्रहरघुवीरस्तवस्समाप्तः ॥

R. No. 5779

Paper. 10½ × 9½ inches. Foll. 22. Lines, 20 in a page. Devanāgarī. Good. Extent, 660 Granthas.

Transcribed in 1936–37 from a MS. of Śrī Sarvajñācārya Avargal, Hospet, Bellary district.

हनुमद्विजयसमवाकारः by कृष्णावधूतः

HANUMADVIJAYASAMAVĀKĀRAḤ by Kṛṣṇāvadhūta.

This is a Samavākāra, one of the ten types of Sanskrit dramas. In this work, the success of Hanumān over the demons in Laṅkā is described. From the colophon, it appears that the author Kṛṣṇāvadhūta had proficiency in six languages.

Complete

Beginning :

म—ततो महिरावणो भूलङ्कामागत्य रावणादिष्टः पातालं ययौ। ततः पल्यासमया दूतमुखतो विदितोदन्तेन विभीषणेनोपदिष्टो हनुमान् वालेन प्राकारं विरच्य शिबिरमुखे तिष्ठति।

मात—किमत्युपदेशः।

म—महिरावणो रावणचोदितस्सन् रामलक्ष्मणौ पाताललङ्कां नीत्वा भद्रकाल्यै वलिं हास्यति त्वं सर्वथारक्षेति। तद्वयमपीतो निष्टत्य हनुमत्संमुखमेव गच्छामः इतिरथं परिक्रामयति। आयुष्मन् कथमत्रैव विभीषणः।

म—न केवलं विभीषणः। अपितु मायया सह।

* * * *

Colophon :

श्रीघटिकाशतषड्भाषासरसकविताचरणचणस्य कृष्णावधूतकवेः कृतौ श्रीहनुमद्विजयसमवाकारे प्रथमोऽङ्कः।

End :

विभीषणः—तथापीदमस्तु भरतवाक्यम्।

मन्दारमालामकरन्दलोभ-
भ्रामन्मिलिन्दावलिराजमाने।
रक्षोधिपस्य स्फुरदुत्तमाङ्गे
रामस्स्ववामाङ्घ्रितलं निधत्ताम्॥

अपिच—

चिरंजीव श्रीमन् भवनिखिलपृथ्वी भरमहा-
सुरद्विड्विध्वंसप्रणय रघुनाथप्रियतम।

हनुमान्—

चिरं रामः क्षोणीमवतु जनकापत्यसहितः।
समुद्रान्तां दान्तानृषिवत्नरान् वानरगणान्॥
....

वैमानिकाः—

चिरं जीयाद्रामस्तदनुज उदारः क्षितिसुता
हनूमान् सर्व्वारिक्षपणनिपुणो मारुतिरपि ।
अयं राजा भूयाद्रघुपतिसखो राक्षसपुरे
प्रवर्तन्तां सन्तः सुखसुखमिमे तीर्णविपदः ।
इति निष्क्रान्तास्सर्वे ।

Colophon :

श्रीवाटिकाशतषड्भाषासरसकविताचरणचणस्य कृष्णावधूतकवेः कृतौ श्रीहनुमद्विजयसमवाकारे तृतीयोऽङ्कः ॥

R. No. 5780

Paper. 10½ × 9½ inches. Foll. 76. Lines, 20 in a page. Devanāgarī. Good. Extent, 1,854 Granthas.

Restored in 1936–37 from D. No. 11965.

गीतगोविन्दम् - संग्रहदीपिकाव्याख्यासहितम् ।

GĪTAGOVINDAM with the commentary Saṅgrahadīpikā.

Foll. 1*a*—75*a*. Foll. 75*b*–76 are left blank.

Complete.

R. No. 5781

Palm leaf. 14½ × 1½ inches. Foll. 100. Lines, 9 in a page. Grantha. Slightly injured. Extent, 2,600 Granthas.

Purchased in 1936–37 from Śrī K. Raṅgasami Iyengar Avargal, South Śiruvalur, Tindivanam taluk.

रामायणव्याख्या by ईश्वरदीक्षितः ।

RĀMĀYAṆAVYĀKHYĀ by Īśvaradīkṣita.

Almost complete.

Same work as that described under R. No. 4773 ante.

R. No. 5782

Palm leaf. 14 × 1⅓ inches. Foll. 23. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1936–37 from Śrī K. Raṅgasami Iyengar Avargal, South Śiruvalur, Tindivanam taluk.

पदार्थधर्मसंग्रहः by प्रशस्तपादः

PADĀRTHADHARMASAṄGRAHAḤ by Praśastapāda.

Foll. 4a–5b. Extent, 35 Granthas.

Same work as that described under R. No. 1553 (a).

Incomplete.

Foll. 1–3 contains Tarkaviṣayaḥ.

(b) पदार्थधर्मसंग्रहव्याख्या by जगदीशः

PADĀRTHADHARMASAṄGRAHAVYĀKHYĀ by Jagadīśa

Foll. 6a—23b. Extent, 400 Granthas.

This is a commentary on the Padārthadharmasaṅgraha by Jagadīśa tarkālaṅkāra, the author of Tattvacintāmaṇidīdhitiprakāśikā.

Incomplete.

Beginning :

कणभक्षमुनेः पक्षरक्षाविन्यस्तवासनाः ।
सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः ।

ग्रन्थारंभे विघ्नविघाताय कृतस्येश्वरादिप्रणामस्य शिष्याणां शिक्षार्थमादौ निबन्धपूर्वकं प्रवृत्त्यङ्गमभिधेयं दर्शयति प्रशस्तपादाचार्यः प्रणम्येति, ईश्वरं प्रणम्य ततः ईश्वरप्रणामादनु पश्चात् कणादं प्रणम्येत्यन्वयः ।

End :

एवमश्वत्थदलादेः कम्पः स्पर्शवेगवद्द्रव्याभिघातजः कर्म विशेषत्वात् दण्डाभिहत . . . वत् ।

इत्यादिप्रयोगसंभवादिति भावः । तिर्यग्गमनेति, तिर्यग्गमनं स्वभावो अस्य ।

R. No. 5783

Palm leaf. 18¼ × 1½ inches. Foll. 137. Lines, 7 in a page. Grantha. Slightly injured. Extent, 3,562 Granthas.

Purchased in 1936–37 from Śrī K. Raṅgasami Iyengar Avargal, South Śiruvalur, Tindivanam taluk.

अनर्घराघवव्याख्या by हरिहरः

ANARGHARĀGHAVAVYĀKHYĀ by Harihara.

Same work as that described under D. No. 12445.

Complete.

R. No. 5784

Palm leaf. 14¾ × 1¼ inches. Foll. 25. Lines, 5 in a page. Grantha. Injured. Extent, 3.0 Granthas, printed.

Purchased in 1936–37 from Śrī K. Raṅgāswami Ayyangar, South Siruvaliūr, Tindivanam.

भर्तृहरिसुभाषितम् by भर्तृहरि ।

BHARTṚHA ISUBHĀṢITAM by Bhartṛhari

Contains Sṛṅgāraśataka complete

Same work as that described under D. No. 12080.

R. No. 5785

Palm leaf. 18 × 1½ inches. Foll. 130. Lines, 8 in a page. Grantha. Slightly injured. Extent, 4,160 Granthas.

Purchased in 1936–37 from Śrī K. Rangasami Ayyangar Avargal, South Śiruvalur, Tındivanam taluk.

अनर्घराघवव्याख्या · पञ्चिका by विष्णुभट्टः

ANARGHARĀGHAVAVYĀKHYĀ— by Viṣṇubhaṭṭa.

Same work as that described under D. No. 12461.

Complete.

R. No. 5786

Palm leaf. 17 × 1½ inches. Foll. 50. Lines, 7 in a page. Telugu. Much injured. Extent, 1,400 Granthas.

Purchased in 1936–37 from Śrī K. Raṅgasami Ayyangar Avargal, South Śiruvalur, Tındivanam taluk.

श्लोकवार्तिकाव्याख्या · न्यायरत्नाकरः by पार्थसारथिमिश्रः ।

ŚLOKAVĀRTIKAVYĀKHYĀ—NYĀYARATNĀKARAḤ by Pārthasārathimiśra.

This is a commentary on the Ślokavārtika of Kumārila Bhaṭṭa by Pārthasārathimiśra, the author of Śāstradīpikā.

Wants the beginning and end.

Beginning :

तेन श्रोत्रस्य तद्व्यैव व्यापरणं न स्यात् । प्रत्युत विघात एव शब्दगतेनानुवादेन वृत्तस्स्यादित्याह । नानुत्रादेति । पादत्रयेण किञ्चित् प्रतिपादनशब्दस्यापत्तिर्दूरं गच्छेदित्याह । प्रतिवातमिति, कारणमाह तद्गतमिति ।

* * * *

Colophon :

इति महोपाध्यायपार्थसारथिमिश्रविरचिते न्यायरत्नाकरे अर्थापत्तिप्रकरणं समाप्तम् ।

End :

प्रमित इति भवतु, प्रमिते प्रवृत्तिः तथापि किमित्यप्रामाण्यमत आह । परिच्छेदेति । अगृहीतग्रहणं परिच्छेदसंस्कृतौ नास्तीति चोदयति । यदिति । परिहरति यावानिति । ननु संस्कारजन्यस्मृतिपदात् पदार्थस्मृतिरनुप्र ।

R. No. 5787

Palm leaf. 15 × 1¾ inches. Foll. 105. Lines, 7 in a page. Telugu. Slightly injured. Extent, 2,730 Granthas.

Purchased in 1936–37 from Śrī K. Raṅgasami Ayyangar Avargal, South Siruvalur, Tiṇḍivanam taluk.

किरणावलीव्याख्या by रुचिदत्तः ।

KIRAṆĀVALĪVYĀKHYĀ by Rucidatta.

Same work as that described under R. No. 1541.

Incomplete.

R. No. 5788

Palm leaf. 14½ × 1¾ inches. Foll. 19. Lines, 7 in a page. Grantha. Good. Extent, 400 Granthas. Printed.

Purchased in 1936–37 from Śrī K. Raṅgasami Ayyangar Avargal, South Siruvalur, Tiṇḍivanam taluk.

तान्त्रिकमीमांसा by अप्पयदीक्षितः ।

TĀNTRIKAMĪMĀṀSĀ by Appayadīkṣita.

A treatise in which Appayadīkṣita states, that priests employed in Śiva temples offering worship to Lord Śiva according to Saivāgamas, are not Brahmins. The author concludes that Āgamas, regulating the worship in temples are not authoritative.

Complete.

Beginning :

यन्मयं निखिलं विश्वं ब्रह्मविष्णुशिवादिकम् ।
सर्ववेदान्तवेद्योयस्स हरिः श्रेयसेऽस्तु वः ।
अभिप्रवादात् साङ्कर्ये साम्प्रतं सामुपस्थिते ।
कुर्वे तान्त्रिकमीमांसां वैदिकानामहं मुदे ॥

शिवद्विजस्याध्ययनाद्यधिकोराऽस्तिवा नवेति मीमांस्यते। तावत्तदर्थमपि चिन्त्यते। ब्राह्मणं चोपनयनमध्याप्याङ्गममुष्यच।

किं तावत्प्राप्तमस्तीति ब्राह्मणं ब्राह्मणोद्भवात्॥

End:

इयं तान्त्रिकमीमांसा स्मृत्यादिवचनोज्वला।
कृता लोकोपकाराय सज्जनैरभिनन्द्यताम्॥
सन्तोऽपि दोषाः क्षन्तव्याः सन्तोषगुणतत्पराः।
सञ्चरन्तः स्खलन्त्येव सम . . .।
यदुक्तं शिवपारम्यशैवग्रन्थेषु केषु चित्।
नहि मे हार्दभावोऽसौ यतस्सर्वपरो हरिः॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीमद्विश्वजिद्याजि श्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ तान्त्रिकमीमांसा समाप्ता।

R. No. 5789

Palm leaf. 16 × 1⅝ inches. Foll. 70. Lines, 7 in a page. Grantha. Slightly injured. Extent, 1,400 Granthas.

Purchased in 1936–37 from Srī K. Raṅgasami Ayyangar Avargal, South Śiruvalur, Tiṇḍivanam taluk.

रहस्यत्रयसारश्लोकद्राविडव्याख्या।

RAHASYATRAYASĀRAŚLOKADRĀVIḌAVYĀKHYĀ.

See Tamil Part for description.

Incomplete.

R. No. 5790

Palm leaf. 15 × 1¼ inches. Foll. 108. Lines, 7 in a page. Grantha. Slightly injured. Extent, 3,024 Granthas.

Purchased in 1936–37 from Srī K. Raṅgasami Ayyangar Avargal, South Śiruvalur, Tiṇḍivanam taluk.

तत्त्वचिन्तामणिदीधितिव्याख्या - भवानन्दीया।

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ—BHAVĀNANDIYĀ.

Same work as that described under D. No. 4092.

Incomplete.

R. No. 5791

Palm leaf. 16 × 1½ inches. Foll. 155. Line, 8 on a page. Grantha. Slightly injured. Extent, 4,960 Granthas.

Purchased in 1936–37 from Śrī K. Raṅgasami Ayyangar Avargal, South Siruvalur, Tiṇḍivanam taluk.

बोधायनप्रयोगादर्शः by कनकसभापतिः
BODHĀYANAPRAYOGĀDARŚAḤ by Kanakasabhāpati.

Same work as that described under R. No. 1619.
Complete.

R. No. 5792

Palm leaf. 14½ × 1½ inches. Foll. 70. Lines, 12 in a page. Grantha. Much injured. Extent, 3,360 Granthas.

Purchased in 1936–37 from Śrī K. Raṅgasami Ayyangar Avargal, South Siruvalur, Tiṇḍivanam taluk.

न्यायबिन्दुः by पायगोण्डवैद्यनाथः
NYĀYABINDUH by Pāyagoṇḍavaidyanātha.

A treatise on Mīmāṁsā principles interpreted in accordance with Vaiyākaraṇa views.

Incomplete and wants 3 leaves in the beginning.

Beginning :

याजनवदर्थज्ञानज्ञेयाध्ययनफलं तच्चार्थवादेभ्यो यद्यपि यथाश्रुतेभ्यो न संभवति तथापि तात्पर्यात् लक्षणया स्तावकत्वेन सन्निहितविध्ये . . . भवतीति युक्तम्। धर्मप्रामाण्यमिति सिद्धान्तः ।

End :

पुनर्विनियोगवचनं तु परिसंख्याद्यर्थम् । लिङ्गाद्धि अश्वरशना . . . . . . स्तन्निवृत्यर्थं साचैकत्र विधावन्यत्र मन्त्राकाङ्क्षामूलकलैङ्गिकविध्यकल्पनादार्थिकीति न श्रुतहान्यश्रुत ।

R. No. 5793

Palm leaf. 16 × 1½ inches. Foll. 75. Lines, 7 on a page. Telugu. Injured. Extent, 2,100 Granthas.

Purchased in 1937–38 from Śrī K. Raṅgasami Ayyangar Avargal, South Siruvalur, Tiṇḍivanam taluk.

वेदार्थतत्त्वनिर्णयः by लिङ्गाध्वरीन्द्रः
VEDĀRTHATATTVANIRṆAYAḤ by Liṅgādhvarīndra.

In this work, Liṅgādhvarīndra, the son of Govindādhvarīndra, states that the truth contained in some of the passages of the Veda.

Wants beginning in first Pariccheda and wants end in the 2nd Pariccheda.

Beginning :

नमो रोहितायेत्यादि नवमं यजुः। रोहिताय लोहितवर्णाय यद्वारोशब्दस्य वाचकत्वादिरूपः तस्मै हिताय तत्र वा निहिताय स्थपतये प्रभवे विग्रहादीनां वा कर्त्रे, यथा

* * * *

Colophon :

इति श्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजिगोविन्दाध्वरीन्द्रतनय लिङ्गाध्वरीन्द्रविरचिते वेदार्थतत्वनिर्णये प्रथमः परिच्छेदः।

* * * *

सर्वनिदं ब्रह्मविष्णुरुद्र . . . . . इति तिनां जनितादिवो भुविता पृथिव्याः जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोतविष्णोरिति

* * * *

अहमस्मीनि तास्मिंस्त्वयि किं वीर्यमिति अपीदं सर्व माददीय यादिदं पृथिव्यामिति तस्मै तृणं निगदावेतगोतम्येति

R. No. **5794**

Paper. $9\frac{1}{4} \times 3\frac{3}{4}$ inches. Foll. 24. Lines, 7 on a page. Devanāgarī. Good. Extent, 246 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācārya, 22, Raja Hanumantalala Street, Triplicane, Madras.

कर्मनिर्णयः by आनन्दतीर्थः

KARMANIRṆAYAḤ by Ānandatīrtha.

In this work, Ānandatīrtha shows that all the various passages, which enjoin the performance of acts to propitiate Gods like Indra, Varuṇa and others, refer to God Viṣṇu alone.

Complete.

foll. 24*b* and 25 contains Tattvanirṇaya—Incomplete.

R. No. 5795

Paper. 12 × 5½ inches. Foll. 15. Lines, 11 on a page. Devanāgarī. Injured. Extent, 412 Granthas. Not printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācariar, 22, Raja Hanumantalala Street, Triplicane, Madras.

षट्प्रश्नोपनिषत्खण्डार्थः ।

ṢAṬPRAŚNOPANIṢATKHAṆḌĀRTHAḤ.

In this work, the idea, contained in the "ṣaṭ praśna" upanisad, is given in brief.

Complete.

Beginning :

श्रीरङ्गविट्ठलं नत्वा सर्वज्ञादीन् गुरूनपि ।
षट्प्रश्नाख्योपनिषट्टीकार्थो विनिगद्यते ॥

इह खलु संसारपारावारे विनिपतितमधिकारिणं जनं जननी तनयमिव परमात्मतत्वज्ञानप्लवेनोद्धर्तुं प्रवृत्तेयमाथर्वणीब्राह्मणोपनिषत् । अस्या उपनिषदो वासुदेवो मुख्यतया प्रतिपाद्यो देवता । प्राणादयस्तु तच्छेषतया तथेतिज्ञेयम् ।

End :

कोहि नामैव मुपकुर्यादिति । एवमाख्यायिकां समाप्य वेदपुरुषः शिष्यशिक्षार्थमाह—नमः परमऋषिभ्यः । पिप्पलादि . . इति द्विर्वचनमादरार्थमित्यशेष मतिमङ्गलामिति । इति षष्ठप्रश्नप्रतिवचनम् ।

Colophon :

इति षट्प्रश्नोपनिषत्खण्डार्थः समाप्तः ।

Scribe adds :

दुर्मुखिनामसंवत्सर कार्तिकशुद्धदशमीभानुवासरे एतच्छ्रवणं संपूर्णम् ।

R. No. 5796

Paper. 12¼ × 4 inches. Foll. 5. Lines, 8 on a page. Devanāgarī. Injured. Extent, 125 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācar, 22, Raja Hanumantalala Street, Triplicane, Madras.

तन्त्रसारसंग्रहः by आनन्दतीर्थः ।

TANTRASĀRASAṄGRAHAḤ by Ānandatīrtha.

Same work as that described under R. No. 573 (*l*).

Complete 1 and 2 Adhyāyas.

R. No. 5797

Paper. 12 × 5¼ inches. Foll. 47. Lines, 13 on a page. Devanāgarī. Much injured. Extent, 1,794 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācar, 22, Raja Hanumantalala Street, Triplicane, Madras.

महाभारतम् by व्यासः

MAHĀBHĀRATAM by Vyāsa.

Same work as that described under D. No. 1915.

Complete Śalyaparvan.

R. No. 5798

Paper. 12½ × 4¾ inches. Foll. 40. Lines, 11 on a page. Devanāgarī. Much injured. Extent, 1,485 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācar, 22, Raja Hanumantalala Street, Triplicane, Madras.

तत्त्वप्रकाशिकाव्याख्या - भावबोधः by रघूत्तमयतिः ।

TATTVAPRAKĀŚIKĀVYĀKHYĀ—BHĀVABODHAḤ by Raghūttamayati.

Same work as that described under R. No. 878 *ante*.

Contains 3rd and 4th Padas in the first Adhyāya.

Beginning :

तनत्वन ततोभिन्नब्रह्मणो न संभवति । चेतनस्य जडात्यन्तभिन्नस्य जडात्मना भवनस्य यतोदेवदत्तघटादावन्यत्राद्दष्टेरिति विकारकारण मेवेति तद्पो सृजतेत्यादौ तेजः प्रभृतिभूतानामबादिकं प्रत्युपादानत्वस्या विवक्षितत्वादि ति भावः ।

End :

अत्र पादे विरोधि सर्व वाग्दूष्य कारणस्त्रीनिषेधेनापृथक् समन्वयार्थानि स्थानान्येतानि सर्व इत्यनुव्याख्याने व्यक्तः "कर्म वाक्यैश्च वाक्य एको मितात्मकः" अवान्तरंकारणश्च प्रकृतिः शून्यमेव च" इति संग्रहे चोक्तन्यायेन प्रत्येकमेकैकाधिकरण मेकैका पेटिकेति ज्ञेयम्।

Colophon :

इति श्रीमद्रघुवर्यतीर्थ पूज्यपाद शिष्य रघूत्तमयतिकृते तत्वप्रकाशिका भावबोधे प्रथमाध्यायस्य चतुर्थः पादः।

R. No. 5799

Paper. 12½ × 4½ inches. Foll. 6. Lines, 11 on a page. Devanāgarī. Slightly injured. Extent, 199 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācar, 22, Raja Hanumantalala Street, Triplicane, Madras.

ब्रह्मसूत्रभाष्यव्याख्या — दीपिका by जगन्नाथयतिः

BRAHMASŪTRABHĀṢYAVYĀKHYĀ—DĪPIKĀ by Jagannātha-yati.

Same work as that described under D. No. 4814.

R. No. 5800

Paper. 10½ × 3 inches. Foll. 161. Lines, 9 on a page. Devanāgarī. Injured. Extent, 4,350 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācar, Hanumantalala Street, Triplicane, Madras.

भगवद्गीताभाष्यटीका —प्रमेयदीपिका —by Jayatīrtha.

BHAGAVADGĪTĀBHĀṢYAṬĪKĀ—PRAMEYADĪPIKĀ.

Same work as that described under R. No. 5811.

Complete.

R. No. 5801

Paper. 12 × 5 inches. Foll. 12. Lines, 10 on a page. Devanāgarī. Good. Extent, 427 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācar, Hanumantalala Street, Triplicane, Madras.

तत्त्वसंख्यानविवरणव्याख्या by व्यासतीर्थः
TATTVASAṄKHYĀNAVIVARAṆAVYĀKHYĀ by Vyāsatirtha.

Similar to the work described under R. No. 3928 (*m*).

Complete.

Beginning :

लक्ष्मीपते पदद्वन्द्वं नत्वा गुरूकृपाबलात् ।
व्याकरिष्ये यथाबोधं तत्वसङ्ख्यानपञ्चिकाम् ॥

इह खलु सुखमेव मे स्याद् दुःखं मनागपि माभूदिति निखिला-पेक्षितमोक्षस्य भगवत्स्वातन्त्र्यज्ञानसाध्यत्वात्तदर्थं प्रकृतं तत्वसङ्ख्यानं व्याचिख्यासुः जयतीर्थपूज्यचरणः प्रारिप्सितसमाप्त्यादिप्रयोजनमविगीत शिष्टाचारप्राप्तं विशिष्टेष्टदेवतानतिस्तुतिलक्षणं मङ्गलमनुष्ठाय शिष्यशिक्ष-णाय ग्रन्थे निबध्नन् शिष्यावधानाय चिकीर्षितं प्रतिजानीते । लक्ष्मीप-तेरिति ।

End :

नचैवं नवनवस्तुविशेषेत्यादिविरोध इति वाच्यम् ।
अभिव्यक्त्यभिप्रायेण तस्योपपत्ते । विस्तृतं चैतदन्यत्रेति दिक् ।
यद्वा रमायाः प्रकृतिसंबन्धाभावे हि ज्ञानाभावत्वादिति भावः ।

कृतिप्रतिपादित मगुणवन्त मन्तेपि स्तुवन् तत्प्रीतिं प्रार्थयते । पद्मेति ।

कमलाकमलोद्भूतमुखंयस्याखिलं जगत् ।
परतन्त्रं स्वतन्त्रस्य वशे सप्रीयतां हरिः ॥
तत्वसङ्ख्यानटीकायाः पञ्चिकाभुक्तिमात्रतः ।
भूयात् कृता पि सुप्रीत्य श्रीमन्माधवमध्वयोः ॥
द्वैपायनप्रसादेन गुरूणांच कृपाबलात् ।
तत्त्वसङ्गणनाव्याख्या व्याख्यागोचरतामियात् ॥

Colophon :

इति श्रीतत्त्वसङ्ख्यानविवरणं व्यासतीर्थविरचितं समाप्तम् ।

R. No. 5802

Paper. 11¼ × 5 inches. Foll. 27. Lines, 13 on a page. Devanāgarī. Good. Extent, 800 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācar. Hanumantalala Street, Triplicane, Madras.

प्रमाणपद्धतिः जयतीर्थविरचिता

PRAMĀṆAPADDHATIḤ by Jayatīrtha.

Same work as that described under D. No. 4803.

R. No. 5803

Paper. 10 × 5½ inches. Foll. 7. Lines, 15 on a page. Devanāgari. Not good.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācariar, Hanumantalala Street, Triplicane, Madras.

(a) काठकोपानिषद्.

KĀṬHAKŌPANIṢAD.

Foll. 1a-4a, Extent, 100 granthas.

Same work as that described under D. No. 334.

Complete.

(b) काठकोपनिषद्भाष्यम्—आनन्दतीर्थविरचितम्

KĀṬHAKŌPANIṢADBHĀṢYAM by Ānandatīrtha.

Foll. 4a—7a. Extent, 100 granthas.

Same work as that described under D. No. 348.

R. No. 5804

Paper. 12 × 4½ inches. Foll. 32. Lines, 9 on a page. Devanāgarī. Not good. Extent, 710 granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Hanumantalala Street, Triplicane, Madras.

ब्रह्मसूत्रभाष्यव्याख्या—तत्वप्रकाशिका—जयतीर्थप्रणीता

BRAHMASŪTRABHĀṢYAVYĀKHYĀ—TATTVAPRAKĀŚIKĀ by Jayatīrtha.

Same work as that described under R. No. 1148.

Contains 2nd and 3rd Pādas of 1st Adhyāya—3rd incomplete.

R. No. 5805

Paper. 12 × 4 inches. Foll. 57. Lines, 9 on a page. Devanāgarī. Good. Extent, 1,000 granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācariar, Hanumantalala Street, Triplicane, Madras.

भगवद्गीतातात्पर्यनिर्णयः — आनन्दतीर्थप्रणीतः
BHAGAVADGĪTĀTĀTPARYANIRṆAYAḤ by Ānandatīrtha.

Same work as that described under R. No. 455.

Complete.

R. No. 5806

Paper. 12 × 4½ inches. Foll. 139. Lines, 8 on a page. Dēvanāgarī. Good. Extent, 3,350 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācar, Hanumantalala Street, Triplicane, Madras.

ब्रह्मसूत्रभाष्यटीकाविवृतिः — तात्पर्यचन्द्रिका by व्यासयतिः
BRAHMASŪTRABHĀṢYAṬĪKĀVIVṚTIH—TĀTPARYACANDRIKĀ by Vyāsayati.

Same work as that described under R. No. 4110 (*b*).
2nd Adhyāya complete.

Beginning :

पूर्वेणोक्ते समन्वयेऽनेन विरोधः परिह्रियत इत्यध्याययो र्हेतुहेतुमद्भाव-लक्षणा सङ्गतिः। पूर्वोहि एतन्निरसनीयाविरोधशङ्काविषयभूतसमन्वयो-पस्थापकतयाऽस्यहेतुः। अयं वा विरोधिनिरासेन समन्वयस्थैर्यसाधकत्वा-त्तस्यहेतुः। तथाचसमन्वयाक्षेपसमाधानार्थत्वादस्य तदनन्तरता युक्ता।

युक्तिभिः समयैः शुद्धवेदैर्युक्त्युपबृंहितैः।
वेदैश्चाप्यविरोधोत्र क्रमात् पादेषु कीर्त्यते॥

अत्राद्यपादे युत्क्यविरोधः। द्वितीये लौकिकार्थगोचरबहुजनपरिगृहीत-वाक्यसन्दर्भरूपसमयाविरोधः। तृतीये केवलश्रुत्यविरोधः। चतुर्थे सयुक्तिकश्रुत्याविरोधः।

Colophon :

इति श्रीमद्व्यासयतिना विरचितायां श्रीमद्भाष्यतात्पर्यचन्द्रिकायां द्वितीयाध्यायस्य प्रथमः पादः।

End :

किञ्च सौत्रेण भौमशब्देन तैजसत्वाद्युपलक्षणे यथाशाब्दमितरयोरिति व्यर्थं। मांसादित्यादिशब्दोक्तलोहितमज्जारूप दृष्टान्तगताप्यतेजसत्वयोरपि भौमशब्देनैव लाभात्। अनुपलक्षणे च मांसादित्यादिशब्दोक्तवाग्रूप दार्ष्टान्तिकस्य तैजसत्वं न सिध्येदिति यत्किञ्चिदेतत्। केचित्तु अनेन जीवेनेति श्रुतेः जीवविशेषहिरण्यगर्भकर्तृकं नामरूपव्याकरणमिति पूर्वपक्षयन्ति। तन्न। जीवशब्दमात्रेण हिरण्यगर्भकर्तृकत्वं पूर्वमेवदूषितं।

Colophon :

इति श्रीमद्ब्रह्मण्यतीर्थपूज्यपादशिष्येण व्यासयतिना विरचितायां श्रीमद्भाष्यटीकाविवृतौ तात्पर्यचन्द्रिकायां द्वितीयाध्यायस्य चतुर्थ : पादः । समाप्तश्चद्वितीयाध्यायः ।

R. No. **5807**

Paper. 10½ × 4 inches. Foll. 404. Lines, 12 on a page. Devanāgarī. Not good. Extent, 13,000 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācāriār, Hanumantalala Street, Triplicane, Madras.

अभिनवताण्डवम् by सत्यनाथयतिः ।
ABHINAVATĀṆḌAVAM by Satyanāthayati.

A work dealing with the epistemology of the Dvaita school of Vedānta by Satyanāthayati, disciple of Satyanidhitīrtha.

Complete.

Beginning :

यदीयचरणस्पर्शाच्छिलाभू द्रतिसत्तमा ।
अहल्या ज्ञानसिद्ध्यर्थं रामचन्द्रं तमाश्रये ॥
ज्ञाने यः स्थापयामास देवमानवपक्षिषु ।
ज्ञानविज्ञानसिध्यर्थं वेदव्यासमहं भजे ॥
अनुव्याख्यामृताम्भोधिर्यदास्या न्निस्सृतोमरान् ।
नरान् करोति तं वन्दे पूर्णबोधं जगद्गुरूम् ॥

Colophon :

इति श्रीमत्सत्यानिधितीर्थश्रीचरणचरणाराधकश्रीमत्सत्यनाथयति विरचिते अभिनवताण्डवे प्रत्यक्षखण्डः समाप्तः ।

End :

तदपि न । चेष्टातो निष्कम्पप्रवृत्तिदर्शनेन संज्ञाप्रतिभयोरन्यतरस्मादित्यनवधारणायोगात् । चेष्टातः अनुमिनोमीति व्यवहारदर्शनाच्च । यदपि चत्वारि प्रमाणानीति । तदप्ययुक्तं । अर्थापत्त्यादीनामिवोपमानस्यपि पृथक् प्रामाण्याभावात् । उपमानस्यानुमानान्तर्भावस्तु प्रागेव दर्शितः इत्यशेषमतिमङ्गलम् ।

Colophon :

इति श्रीमत्सत्यनिधितीर्थश्रीचरणाराधकश्रीमत्सत्यनाथयतिविरचिते अभिनवताण्डवे शब्दखण्डः समाप्तः ।

R. No. 5808

Paper. 9 × 4½ inches. Foll. 88. Lines, 12 on a page. Devanagari. Not good. Extent, 1,936 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Hanumantalala Street, Triplicane, Madras.

तत्वप्रकाशिकाव्याख्या - वाक्यार्थमुक्तावली by श्रीनिवास
TATTVAPRAKĀŚIKĀVYĀKHYĀ—VĀKYĀRTHAMUKTĀVALĪ by Śrīnivāsa.

Similar to the work described under R. No. 4109.

Contains 1st Adyhyāya and two Pādas of the 2nd Adhyāya.

Beginning :

युक्तिभिरसमर्थैः शुद्धवेदै र्युत्क्युण्वृद्धितैः ॥
यद्गुणा न विरुध्यन्ते तमुपासे श्रियः पतिम् ॥

पूर्वाध्यायेति । ब्रह्मस्वरूपनिरूपणेन च दोषात् किं द्वितीयेनेत्यत इति पूरणीयं । उक्तस्समन्वयः साक्षादाविरोधोऽत्र साध्यत इत्यनुभाष्ये समन्वयप्राधान्येन सङ्गातिरूक्ता । अत्रतु समन्वयार्थप्राधान्येनेति भेद इति भावेनेक्तेर्थे इति भाष्यभावमाह । अशेषेति । शास्त्रयोनित्वादिति जगज्जन्मादिकारणत्वमुखानन्तगुणपूर्णत्वे शास्त्रं प्रमाणीकृत्य समन्वयमुखेनेत्यर्थः ।

End :

तुरीयं सर्वविषयमिति सूत्रक्रमः । अत्राद्यषट्कहैतुकानां पाषण्ड निरासके द्वितीयषट्केऽधिकरणचतुष्टये वैदिकपाषाण्डिना मधिकरणद्वये वैदिकपाषाण्डिनोर्निरासः इति पेटिका ज्ञेया ।

Colophon :

